## आ च हौ । (११७/२४९९)

जहातेराकारश्चान्तादेशो भवति इकारश्च अन्यतरस्यां हौ परतः । जहाहि, जहिहि, जहीहि ॥

## लोपो यि । (११८/२५००)

लोपो भवति जहातेः यकारादौ क्ङिति सार्वधातुके परतः । जह्यात्, जह्याताम्, जह्युः[1] ॥

## घ्वसोरेद्धावभ्यासलोपश्च । (११९/२४७)

घुसञ्ज्ञकानामङ्गानाम् अस्तेश्च एकारादेशो भवति हौ परतः अभ्यासलोपश्च । देहि । धेहि । अस्तेः– 'श्नसोरल्लोपः' (६.४.१११/२४६९) इत्यकारलोपः, एधि । [2]शिदयं लोपः, तेन सर्वस्याभ्यासस्य भवति ॥

## अत एकहल्मध्येऽनादेशादेर्लिटि । (१२०/२२६०)

[3]लिटि [4]परत आदेशः आदिर्यस्याङ्गस्य नास्ति तस्य एकहल्मध्ये असहाययोर्हलो[5]र्मध्ये योऽकारस्तस्य एकारादेशो [6]भवति, अभ्यासलोपः च लिटि क्ङिति परतः[7] । [8]रेणतुः । रेणुः । [9]येमतुः । येमुः । [10]पेचतुः । पेचुः । [11]देमतुः । देमुः । अतः इति किम् ? दिदिवतुः । दिदिवुः । तपरकरणं किम् ? ररासे, ररासाते, ररासिरे । [12]एकहल्मध्ये इति किम् ? [13]शश्रमतुः । शश्रमुः । तत्सरतुः । तत्सरुः । अनादेशादेः इति किम् ? चकणतुः । चकणुः । जगणतुः । [14]जगणुः । बभणतुः । [15]बभणुः । लिटः आदेशविशेषणं किम्? इहापि यथा स्यात्, नेमतुः । नेमुः । सेहे, सेहाते, सेहिरे । [16]अनैमित्तिके नत्वसत्वे, तदादिर्लिटि आदेशादिर्न भवति ।

इह अभ्यासजश्त्वचर्त्वयोरसिद्धत्वं [17]नास्ति, [18]तेन तदादिरप्यादेशादिर्भवति । तथा च फलिभजोरेत्वं विधीयते । रूपाभेदे चादेशादिर्नाश्रीयते इति शसिदद्योः प्रतिषेधवचनं ज्ञापकम् । अन्यथा हि पेचतुः, पेचुः, [19]देमतुः, देमुः इत्येवमादीनामपि प्रकृतिजश्चरादीनामेत्वं न स्यात् । [20]क्ङिति इत्येव, अहं पपच । अहं पपठ ।

[७९२] दम्भेरेत्वं वक्तव्यम् । (म.भा. ३ २१८)

देभतुः । देभुः । नलोपस्यासिद्धत्वान्न प्राप्नोति ।

[७९३] नशिमन्योरलिट्येत्वं वक्तव्यम् । (म.भा. ३.२१८)

अनेशम् । मेनका । अनेशम् इति नशेः लुङि पुषादित्वाद् अङ् । मेनका इति मनेः 'आशिषि च' (३.१.१५०/२९१२) इति वुन् । क्षिपकादिषु प्रक्षेपादित्वं न क्रियते ।

---

1. सार्वधातुके इत्येव, हेयात् इत्यधिकम् ड.फ.ह. 2. शेरयं क. 3. किति इत्यधिकम् फ. ह. इ. 4. परभूतः फ, परभूते क.इ. 5. मध्यगतस्याकारस्य ह. 6. भवति नास्ति फ. 7. एकशब्द असहायवाची । असहाययोः मध्ये इत्यर्थः इत्यधिकम् फ.ह. 8. रण इत्यधिकम् ह. 9. यम इत्यधिकम् ह. 10. पच इत्यधिकम् ह. 11. दम इत्यधिकम् ह, मेदतुः मेदुः फ. 12. एकहल्मध्यगत फ. 13. ततक्षतुः ततक्षुः फ. ह, चक्षरतुः चक्षरुः ब.क.इ. 14. जगणुः नास्ति फ. 15. बभणुः नास्ति ड. 16. नैमित्तिके न क. 17. नाश्रीयते फ. ह. 18. तेन नास्ति फ. 19. उदाहरणमिदं नास्ति फ. 20. किति इ.